सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः
verses :The nature of the Atman described भ्रान्त्या मनुष्योऽहमहं द्विजोऽहं तज्ज्ञोऽहमज्ञोऽहमतीव पापी ।
भ्रष्टोऽस्मि शिष्टोऽस्मि सुखी च दुःखी- त्येवं विमुह्यात्मनि कल्पयन्ति ॥ ४६२॥ अनात्मनो जन्मजरामृतिक्षुधा- तृष्णासुखक्लेशभयादिधर्मान् ।
विपर्ययेण ह्यतथाविधेऽस्मि- न्नारोपयन्त्यात्मनि बुद्धिदोषात् ॥ ४६३॥ भ्रान्त्या यत्र यदध्यासस्तत्कृतेन गुणेन वा । दोषेणाप्यणुमात्रेण स न सम्बध्यते क्वचित् ॥ ४६४॥ किं मरुर्मृगतृष्णाम्बुपूरेणार्द्रत्वमृच्छति । दृष्टिसंस्थितपीतेन शङ्खः पीतायते किमु ॥ ४६५॥ वातकल्पितनैल्येन व्योम किं मलिनायते ।
शिष्यः ---
प्रत्यगात्मन्यविषयेऽनात्माध्यासः कथं प्रभो ॥ ४६६॥ पुरो दृष्टे हि विषयेऽध्यस्यन्ति विषयान्तरम् । तद्दृष्टं शुक्तिरज्ज्वादौ सादृश्याद्यनुबन्धतः ॥ ४६७॥ परत्र पूर्वदृष्टस्यावभासः स्मृतिलक्षणः ।
अध्यासः स कथं स्वामिन् भवेदात्मन्यगोचरे ॥ ४६८॥ नानुभूतः कदाप्यात्माननुभूतस्य वस्तुनः ।
सादृश्यं सिध्यति कथमनात्मनि विलक्षणे ॥ ४६९॥

अनात्मन्यात्मताध्यासः कथमेष समागतः ।
निवृत्तिः कथमेतस्य केनोपायेन सिध्यति ॥ ४७०॥ उपाधियोग उभयोः सम एवेशजीवयोः ।
जीवस्यैव कथं बन्धो नेश्वरस्यास्ति तत्कथम् ॥ ४७१॥ एतत्सर्वं दयादृष्ट्या करामलकवत्स्फुटम् । प्रतिपादय सर्वज्ञ श्रीगुरो करुणानिधे ॥ ४७२॥

श्रीगुरुः ---
न तावदयमेकान्तेनात्माऽविषय इष्यते । अस्यास्मत्प्रत्ययार्थत्वादपरोक्षाच्च सर्वशः ॥ ४७३॥ प्रसिद्धिरात्मनोऽस्त्येव न कस्यापि न दृश्यते । प्रत्ययो नाहमस्मीति न ह्यस्ति प्रत्यगात्मनि ॥ ४७४॥ न कस्यापि स्वसद्भावे प्रमाणमभिकाङ्क्ष्यते । प्रमाणानां च प्रामाण्यं यन्मूलं किंनु बोधयेत् ॥ ४७५॥ मायाकार्यैस्तिरोभूतो नैष आत्मानुभूयते । मेघवृन्दैर्यथा भानुस्तथायमहमादिभिः ॥ ४७६॥
पुरस्थ एव विषये वस्तुन्यध्यस्यतामिति ।
नियमो न कृतः सद्भिर्भ्रान्तिरेवात्र कारणम् ॥ ४७७॥ दृगाद्यविषये व्योम्नि नीलतादि यथाबुधाः ।
अध्यस्यन्ति तथैवास्मिन्नात्मन्यपि मतिभ्रमात् ॥ ४७८॥ अनात्मन्यात्मताध्यासे न सादृश्यमपेक्ष्यते ।
पीतोऽयं शङ्ख इत्यादौ सादृश्यं किमपेक्षितम् ॥ ४७९॥ निरुपाधिभ्रमेष्वस्य नैवापेक्षा प्रदृश्यते । ष्वस्मिन्नैवा सोपाधिष्वेव तद्दृष्टं रज्जुसर्पभ्रमादिषु ॥ ४८०॥

किञ्चिद्वक्ष्यामि सादृश्यं शृणु तत्परः ।
अत्यन्तनिर्मलः सूक्ष्म आत्मायमतिभास्वरः ॥ ४८१॥ बुद्धिस्तथैव सत्त्वात्मा साभासा भास्वरामला । सांनिध्यादात्मवद्भाति सूर्यवत्स्फटिको यथा ॥ ४८२॥ आत्माभासं ततो बुद्धिर्बुद्ध्याभासं ततो मनः । अक्षाणि मन आभासान्यक्षाभासमिदं वपुः ।
अत एवात्मताबुद्धिर्देहाक्षादावनात्मनि ॥ ४८३॥ मूढानां प्रतिबिम्बादौ बालानामिव दृश्यते ।
सादृश्यं विद्यते बुद्धावात्मनोऽध्यासकारणम् ॥ ४८४॥ अनात्मन्यहमित्येव योऽयमध्यास ईरितः । स्यादुत्तरोत्तराध्यासे पूर्वपूर्वस्तु कारणम् ॥ ४८५॥ सुप्तिमूर्छोत्थितेष्वेव दृष्टः संसारलक्षणः । अनादिरेषाविद्या तत्संस्कारोऽपि च तादृशः ॥ ४८६॥

अध्यासबाधागमनस्य कारणं
प्रवक्ष्यामि समाहितात्मा ।
यस्मादिदं प्राप्तमनर्थजातं जन्माप्ययव्याधिजराधिदुःखम् ॥ ४८७॥ आत्मोपाधेरविद्याया अस्ति शक्तिद्वयं महत् । विक्षेप आवृतिश्चेति याभ्यां संसार आत्मनः ॥ ४८८॥ आवृतिस्तमसः शक्तिस्तद्ध्यावरणकारणम् । मूलाविद्येति सा प्रोक्ता यया सम्मोहितं जगत् ॥ ४८९॥

विवेकवानप्यतियौक्तिकोऽपि
श्रुतात्मतत्त्वोऽपि च पण्डितोऽपि ।
शक्त्या यया संवृतबोधदृष्टि-
रात्मानमात्मस्थमिमं न वेद ॥ ४९०॥
विक्षेपनाम्नी रजसस्तु शक्तिः
प्रवृत्तिहेतुः पुरुषस्य नित्यम् । स्थूलादिलिङ्गान्तमशेषमेतद्-
यया सदात्मन्यसदेव सूयते ॥ ४९१॥ निद्रा यथा पूरुषमप्रमत्तं समावृणोतीयमपि प्रतीचम् ।
तथा वृणोत्यावृतिशक्तिरन्त-र्विक्षेपशक्तिं परिजृम्भयन्ती ॥ ४९२॥ शक्त्या महत्यावरणाभिधानया
समावृते सत्यमलस्वरूपे । पुमाननात्मन्यहमेष एवे- त्यात्मत्वबुद्धिं विदधाति मोहात् ॥ ४९३॥ यथा प्रसुप्तिप्रतिभासदेहे स्वात्मत्वधीरेष तथा ह्यनात्मनः । जन्माप्ययक्षुद्भयतृट्छ्रमादी-

नारोपयत्यात्मनि तस्य धर्मान् ॥ ४९४॥ विक्षेपशक्त्या परिचोद्यमानः करोति कर्माण्युभयात्मकानि । भुञ्जान एतत्फलमप्युपात्तं
परिभ्रमत्येष भवाम्बुराशौ ॥४९५ ॥ अध्यासदोषात्समुपागतोऽयं
संसारबन्धः प्रबलः प्रतीचः ।
यद्योगतः क्लिश्यति गर्भवास-जन्माप्ययक्लेशभयैरजस्रम् ॥ ४९६॥
अध्यासो नाम खल्वेष वस्तुनो योऽन्यथाग्रहः । स्वाभाविकभ्रान्तिमूलं संसृतेरादिकारणम् ॥ ४९७॥ सर्वानर्थस्य तद्बीजं योऽन्यथाग्रह आत्मनः ।
ततः संसारसम्पातः सन्ततक्लेशलक्षणः ॥ ४९८॥ अध्यासादेव संसारो नष्टेऽध्यासे न दृश्यते । तदेतदुभयं स्पष्टं पश्य त्वं बद्धमुक्तयोः ॥ ४९९॥ बद्धं प्रवृत्तितो विद्धि मुक्तं विद्धि निवृत्तितः । प्रवृत्तिरेव संसारो निवृत्तिर्मुक्तिरिष्यते ॥ ५००॥ आत्मनः सोऽयमध्यासो मिथ्याज्ञानपुरःसरः । असत्कल्पोऽपि संसारं तनुते रज्जुसर्पवत् ॥ ५०१॥ उपाधियोगसाम्येऽपि जीववत्परमात्मनः । उपाधिभेदान्नो बन्धस्तत्कार्यमपि किञ्चन ॥ ५०२॥ अस्योपाधिः शुद्धसत्त्वप्रधाना
माया यत्र त्वस्य नास्त्यल्पभावः ।
सत्त्वस्यैवोत्कृष्टता तेन बन्धो
नो विक्षेपस्तत्कृतो लेशमात्रः ॥ ५०३॥ सर्वज्ञोऽप्रतिबद्धबोधविभवस्तेनैव देवः स्वयं
मायां स्वामवलम्ब्य निश्चलतया स्वच्छन्दवृत्तिः प्रभुः । सृष्टिस्थित्यदनप्रवेशयमनव्यापारमात्रेच्छया कुर्वन्क्रीडति तद्रजस्तम उभे संस्तभ्य शक्त्या स्वया ॥ ५०४॥

तस्मादावृतिविक्षेपौ किञ्चित्कर्तुं न शक्नुतः ।

स्वयमेव स्वतन्त्रोऽसौ तत्प्रवृत्तिनिरोधयोः ॥ ५०५॥ तमेव साधुकर्मेति श्रुतिर्वक्ति महेशितुः । निग्रहेऽनुग्रहे शक्तिरावृतिक्षेपयोर्यतः ॥ ५०६॥ रजसस्तमसश्चैव प्राबल्यं सत्त्वहानतः ।
जीवोपाधौ तथा जीवे तत्कार्यं बलवत्तरम् ॥ ५०७॥
तेन बन्धोऽस्य जीवस्य संसारोऽपि च तत्कृतः ।
सम्प्राप्तः सर्वदा यत्र दुःखं भूयः स ईक्षते ॥ ५०८॥
एतस्य संसृतेर्हेतुरध्यासोऽर्थविपर्ययः । अध्यासमूलमज्ञानमाहुरावृतिलक्षणम् ॥५०९ ॥
verses 510-519 Knowledge destroys Ignorance, not Action ॥ २८ ॥ अज्ञाननिवृत्तिः ॥
अज्ञानस्य निवृत्तिस्तु ज्ञानेनैव न कर्मणा ।
अविरोधितया कर्म नैवाज्ञानस्य बाधकम् ॥ ५१०॥
कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ।
कर्मणः कार्यमेवैषा जन्ममृत्युपरम्परा ॥ ५११॥ नैतस्मात्कर्मणः कार्यमन्यदस्ति विलक्षणम् । अज्ञानकार्यं तत्कर्म यतोऽज्ञानेन वर्धते ॥ ५१२॥ यद्येन वर्धते तेन नाशस्तस्य न सिध्यति ।
येन यस्य सहावस्था निरोधाय न कल्पते ॥ ५१३॥ नाशकत्वं तदुभयोः को नु कल्पयितुं क्षमः ।
सर्वं कर्माविरोध्येव यतोऽज्ञानस्य सर्वदा ॥ ५१४॥

ततोऽज्ञानस्य विच्छित्तिः कर्मणा नैव सिध्यति । यस्य प्रध्वंसजनको यत्संयोगोऽस्ति तत्क्षणे ॥ ५१५॥ तयोरेव विरोधित्वं युक्तं भिन्नस्वभावयोः । तमःप्रकाशयोर्यद्वत्परस्परविरोधिता ॥ ५१६॥ अज्ञानज्ञानयोस्तद्वदुभयोरेव दृश्यते ।
न ज्ञानेन विनाऽज्ञाननाशः केनापि सिध्यति ॥ ५१७॥

तस्मादज्ञानविच्छित्त्यै ज्ञानं सम्पादयेत्सुधीः । आत्मानात्मविवेकेन ज्ञानं सिध्यति नान्यथा ॥ ५१८॥ युक्त्यात्मानात्मनोस्तस्मात्करणीयं विवेचनम् । अनात्मन्यात्मताबुद्धिग्रन्थिर्येन विदीर्यते ॥ ५१९॥ verses 520-611 Refutation of the false doctrines
॥ २९ ॥ कुमत खण्डनम् ॥ ५२०-६११
आत्मानात्मविवेकार्थं विवादोऽयं निरूप्यते । येनात्मानात्मनोस्तत्त्वं विविक्तं प्रस्फुटायते ॥ ५२०॥ मूढा अश्रुतवेदान्ताः स्वयं पण्डितमानिनः । ईशप्रसादरहिताः सद्गुरोश्च बहिर्मुखाः ॥ ५२१॥